सर्व्वकर्म्मनिवृत्तिः । यथा, गीतायाम् । ६ । ३ ।
"योगारूढस्य तस्यैव शमः कारणमुच्यते ॥"
"शमः उपरमः सर्व्वकर्म्मभ्यो निवृत्तिः ।" इति शङ्करभाष्यम् ॥ शान्तरसस्य स्थायिभावः । यथा, साहित्यदर्पणे । ३ । २३८ ।
"शान्तः शमः स्थायिभाव उत्तमः प्रकृतिर्म्मतः ॥"
निवृत्तिः । यथा, राजतरङ्गिण्याम् । २ । ५६ ।
"अभवन्निर्म्मलं व्योम देवीकृत्यैः सह क्रमात् ।
साकं भूपालशोकेन दुर्भिक्षस्य शमं ययौ ॥")

शमकः, त्रि, (शामयतीति । शम + णिच् + ण्वुल् । "नोदात्तोपदेशस्येति ।" ७ । ३ । ३४ । इति न दीर्घः ।) शान्तिकारकः । ण्यन्तशमधातोर्ण्वकप्रत्ययेन निष्पन्नमेतत् ॥

शमथः, पुं, (शम + "टुशमिदमिभ्यश्च ।" इति अथः । इत्युज्ज्वलदत्तः । ३ । ११४ ।) शान्तिः । इत्यमरः ॥ मन्त्री । इति मेदिनी ॥

शमनं, क्ली, (शम + ल्युट् ।) यज्ञार्थपशुहननम् । इत्यमरः ॥ शान्तिः । इति मेदिनी ॥ (यथा, पाणिनौ । ५ । १ । ३८ । "वातस्य शमनं कोपनं वा ।" इति काशिका ॥) चर्व्वणम् । इति धरणिः ॥ हिंसा । इति हेमचन्द्रः ॥ (प्रतिसंहारः । यथा, मार्कण्डेये । ७८ । १३ ।
"निमेषकाष्ठादिमयः कालरूपः क्षयात्मकः ।
प्रसीद स्वेच्छया रूपं स्वतेजःशमनं कुरु ॥"
निवारकः । यथा, तत्रैव देवीमाहात्म्ये ।
"दुर्व्वृत्तवृत्तशमनं तव देवि ! शीलम् ॥")

शमनः, पुं, (शमयति पापिनां कर्म्म आलोचयतीति । कर्त्तरि ल्युः ।) यमः । इत्यमरः ॥ मृगभेदः । इति शब्दचन्द्रिका ॥ कलायः । इति राजनिर्घण्टः ॥

शमनस्वसा, [ऋ] स्त्री, (शमनस्य यमस्य स्वसा ।) यमुना । इत्यमरः ॥

शमनी, स्त्री, (शमयति नृणां व्यापारान् । शम + ल्युः । स्त्रियां ङीप् ।) रात्रिः । इति शमनीषदशब्ददर्शनात् ॥ (शाम्यते अनेन इत्यर्थे करणे ल्युटि शान्तिकारके, त्रि । यथा, भागवते । ३ । २४ । ३६ ।
"मात्रे चाध्यात्मिकीं विद्यां शमनीं सर्व्वकर्म्मणाम् ॥")

शमनीषदः, पुं, (शमन्यां सीदतीति । सद् + अच् ।) निशाचरः । राक्षसः । इति त्रिकाण्डशेषः ॥

शमलं, क्ली, (शम + "शाकशम्योर्णित् ।" उणा० १ । । १११ । इति कलः ।) विष्ठा । इत्यमरः ॥ पापम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, भागवते । २ । ७ । ३ ।
"जह्रे यथात्मशमलं गुणसङ्गपङ्कम् ॥")

शमान्तकः, पुं, (शमस्य शान्तेरन्तकः ।) कामदेवः । इति त्रिकाण्डशेषः ॥

शमिः, स्त्री, शिम्बा । इति हेमचन्द्रः ॥

शमितः, त्रि, (शम + क्तः ।) शान्तः । इत्यमरः ॥

शमिरः, पुं, शमीवृक्षः । इति शब्दरत्नावली ॥

शमिरोहः, पुं, शिवः । इति त्रिकाण्डशेषः ॥

शमी, स्त्री, वृक्षविशेषः । शाँइ इति भाषा । (यथा, शाकुन्तले । ४ ।
"अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥")
तत्पर्य्यायः । सक्तुफला २ शिवा ३ । इत्यमरः ॥ सक्तुफली ४ । इति शब्दरत्नावली ॥ शान्ता ५ तुङ्गा ६ कचरिपुफला ७ केशमथनी ८ ईशानी ९ लक्ष्मीः १० तपनतनया ११ इष्टा १२ शुभकरी १३ हविर्गन्धा १४ मेध्या १५ दुरितदमनी १६ सक्तुफलिका १७ समुद्रा १८ मङ्गल्या १९ सुरभिः २० पापशमनी २१ भद्रा २२ शङ्करी २३ केशहन्त्री २४ शिवाफला २५ सुपत्रा २६ सुखदा २७ । अस्य गुणाः । रूक्षत्वम् । कषायत्वम् । रक्तपित्तातिसारनाशित्वञ्च । तत्फलगुणाः । गुरुत्वम् । स्वादुत्वम् । रूक्षत्वम् । उष्णत्वम् । केशनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"शमी सक्तुफला तुङ्गा केशहन्त्री शिवाफला ।
मङ्गल्या च तथा लक्ष्मीः शमीरः स्वल्पिका स्मृता ॥
शमी तिक्ता कटुः शीता कषाया रेचनी लघुः ।
कफकासभ्रमश्वासकुष्ठार्शःक्रिमिजित् स्मृता ॥"
इति भावप्रकाशः ॥*॥
शिम्बा । छिमड़ा इति भाषा । इत्यमरः ॥ वागुजिः । इति मेदिनी ॥ (कर्म्म । यथा, ऋग्वेदे । ६ । २ । २ ।
"ईळे यज्ञेभिः शशमे शमीभिः ।"
"शमीभिः कर्म्मभिः कृच्छ्रचान्द्रायणादिभिः ॥" इति तद्भाष्ये सायणः ॥)

शमी, [न्] त्रि, शान्तः । शमो विद्यतेऽस्य इत्यर्थे इन्प्रत्ययेन निष्पन्नमिदम् ॥

शमीकः, पुं, मुनिविशेषः । यथा,—
"जलाशयमचक्षाणः प्रविवेश तमाश्रमम् ।
ददर्श मुनिमासीनं शान्तं मीलितलोचनम् ॥"
इति श्रीभागवते । १ । १८ ॥
अस्यार्थः । अचक्षाणः अपश्यन् । तं प्रसिद्धमाश्रमं तस्मिन् मुनिं शमीकम् । इति श्रीधरस्वामी ॥

शमीगर्भः, पुं, (शम्या गर्भः ।) ब्राह्मणः । अग्निः । इति हेमचन्द्रः ॥

शमीधान्यं, क्ली, (शमी यज्ञादिकर्म्म तदर्थं धान्यम् ।) माषादिः । इत्यमरः ॥ तत्पर्य्यायगुणाः ।
"शमीजाः शिम्बिजाः शिम्बातराः सूप्याश्च वैदलाः ।
वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः ॥
वातलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः ।
ऋते मुद्गमकुष्ठाभ्यामन्ये त्वाध्मानकारकाः ॥"
मुद्गमकुष्ठयोराध्मानकारित्वमन्यद्वैदलापेक्षया । न तु सर्व्वथा । एतयोरपि किञ्चिदाध्मानकारित्वदर्शनात् । इति भावप्रकाशः ॥*॥
अपि च ।
"शूकधान्यं शमीधान्यं समातीतं प्रशस्यते ।
परतो वातलं रूक्षं प्रायेणातिनवं गुरु ॥
यवगोधूममाषाश्च तिलाश्चातिनवा हिताः ।
पुराणा विरसा रूक्षा न तथार्थकरा मताः ॥"
इति राजवल्लभः ॥

शमीपत्रा, स्त्री, (शम्याः पत्राणीव पत्राणि यस्याः ।) लज्जालुवृक्षः । इति जटाधरः ॥

शमीरः, पुं, (ह्रस्वा शमी । "कुटीशमीशुण्डाभ्यो रः ।" ५ । ३ । ८८ । इति रः ।) अल्पा शमी । इत्यमरः ॥

शम्पा, स्त्री, विद्युत् । इत्यमरः ॥

शम्याकः, पुं, आरग्वधः । इत्यमरः ॥ विपाकः । यावकः । इति हेमचन्द्रः ॥ (हस्तिनापुरवासी कश्चिद्ब्राह्मणः । यथा, महाभारते । १२ । १७६ । २३ ।
"इत्येतद्धास्तिनपुरे ब्राह्मणेनोपवर्णितम् ।
शम्याकेन पुरा मह्यं तस्मात्त्यागः परो मतः ॥")

शम्यातः, पुं, आरग्वधः । इति शब्दरत्नावली ॥

शम्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) शम्बति । इति दुर्गादासः ॥

शम्बः, पुं, (शम् + "शमेर्व्वन् ।" उणा० ४ । ९४ । इति वन् । यद्वा, शमस्यस्येति । शं + "कंशंभ्यां बभयुस्तितुतयसः ।" ५ । ६ । १३८ । इति वः ।) वज्रम् । (यथा, ऋग्वेदे । १० । ४२ । ७ ।
"उग्रो यः शम्बः पुरुहूत तेन ।"
"शम्ब इति वज्रनाम ।" इति तद्भाष्ये सायणः ॥)
मुषलाग्रस्थलोहमण्डलकम् । इति मेदिनी ॥ लौहकाञ्ची । इति हेमचन्द्रः ॥ अनुलोमकर्षणम् । इति शब्दाज्ञातशब्दटीकायां भरतः ॥ दरिद्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥ भाग्यवति, त्रि । इति रामाश्रमः ॥

शम्बरं, क्ली, सलिलम् । व्रतम् । वित्तम् । इति नानार्थरत्नमाला ॥ चित्रम् । बौद्धव्रतविशेषः । इति विश्वहेमचन्द्रौ ॥ (मेघः । यथा, ऋग्वेदे । २ । २४ । २ । "अदर्द्दर्मन्युना शम्बराणि ॥"
"शम्बराणि मेघनामैतत् मेघान् व्यदर्द्दः वर्षणार्थं विदारितवान् ॥" इति तद्भाष्ये सायणः ॥)

शम्बरः, पुं, मृगविशेषः । दैत्यविशेषः । इति मेदिनी ॥ (यथा, ऋग्वेदे । १ । ५१ । ६ ।
"अरन्धयो तिथिग्वाय शम्बरम् ।"
"शम्बरं एतन्नामानमसुरम् ।" इति तद्भाष्ये सायणः ॥ यथा च महाभारते ।१।६५।२२ ।
"शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः ।
असिलोमा च केशी च दुर्ज्जयश्चैव दानवः ॥")
मत्स्यविशेषः । शैवविशेषः । जिनभेदः । इति विश्वः ॥ युद्धम् । श्रेष्ठः । इति धरणिः ॥ चित्रकवृक्षः । लोध्रः । अर्ज्जुनवृक्षः । इति राजनिर्घण्टः ॥ शम्बरासुरस्य वधोपाख्यानं श्रीभागवते १० स्कन्धे ५५ अध्याये द्रष्टव्यम् ॥

शम्बरकन्दः, पुं, (शम्बरनामकः कन्दः ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥